0-2394

001392

॥ श्रीः ॥

॥ रतिविजयम् ॥

रामस्वामिशास्त्रिणा

विरचितम् ।



श्रीरङ्गस्थ
श्रीवाणीविलासमुद्रायन्त्रालये
संमुद्रितम् ।
१९२३.

(5)

FOREWORD.

This little play owes its origin to a desire expressed at Trichinopoly by some students for the composition of a brief drama, simple in language and structure, for stage representation. Their request coincided with my passion to place a love-offering as a tribute at the lotus feet of our Mother. In the play I have set at naught a few of the over-technical and elaborate rules of dramatic technique which are contained in Sanskrit poetics. I have aimed solely at a natural and quick movement of action and at a high elevation of moral and spiritual tone. Kalidasa's exquisite handling of the story of Rati in *Kumara-Sambhava* has been my inspiration. My measureless and loving adoration for Devi has been my master-impulse. The play must naturally and necessarily suffer from all sorts of inherent and acquired defects and deficiencies. But love must be the excuse as it has been the *motif*. My only reason for the publication of the play is that it has made me better and purer and happier and may perhaps please other adorers of our universal Mother.

NEGAPATAM
5—10—1923.

K. S. RAMASWAMI SASTRI.

PREFATORY NOTE.

THE play aims at presenting the rebirth of love under a new inspiration and with true loyalty to Dharma and to God. Love as a mere thrill of the nerves, as a mere bliss of the body, as a mere blossoming of physical rapture—careless of reverence for the past, purity in the present and social good in the future, and scornful of devotion to Dharma and to God—is destroyed. In its place is created, or rather revivified, Love which is a step in the golden ladder of God-realisation, which confers the bliss of the soul, which finds in physical rapture an image and an echo of a deeper spiritual bliss—careful of reverence for the past, purity in the present and social good in the future, and full of devotion to Dharma and to God. The same dramatic *motif* is in the story of Markandeya where Death the God-forgetting destroyer is killed and then revivified as the servant of God bringing the pain of death as the door to the realisation of further purposes of God in regard to man. The play thus aims at giving a new interpretation to an ancient and beautiful story; and its underlying *motif* is the Lord's statement in the Gita: धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ।

नाटकपात्राणि ।

परमेश्वरः ।

बृहस्पतिः ।

महेन्द्रः ।

वसन्तः ।

कामः ।

चित्रसेनः ।

हिमवान् ।

पुण्डरीकः ।

दुर्गादासः ।

श्यामलादासः ।

राजराजः ।

* * *

पार्वती ।

जया ।

रतिः ।

वासन्तिका ।

सरोजिनी ।

॥ श्रीः ॥

॥ रतिविजयम् ॥



प्रथमोऽङ्कः ।



संसारार्णवभग्नसौख्यतरणिर्जन्मोर्मिसंताडितः
व्याधिग्राहनिपीडितश्च सततं पापैकसख्यं गतः ।
त्यक्तः सर्वजनैर्व्रजामि शरणं कालेन संत्रासितः
साक्षान्मङ्गलदेवतां परगतिं कल्याणपूर्तिप्रदाम् ॥

अपि च,

आनन्दरूपामितप्रभावां
नादस्वरूपां परमेश्वरीं ताम् ।
कालत्रयावर्धितसत्यमूर्तिं
भक्तप्रसन्नां मनसा स्मरामि ॥ २ ॥

(नान्द्यन्ते)

सूत्रधारः--

काव्यकलासौभाग्यं संम्यग्ज्ञात्वा प्रकृष्टमानन्दम् ।
आस्वाद्य चागतेभ्यो नित्यं नतिरस्तु रङ्गरसिकेभ्यः ॥

(इति पुष्पाञ्जलिं विकीर्य नेपथ्याभिमुखमवलोक्य ।)

आर्ये, इतस्तावत् ।

नटः— (प्रविश्य) किं कर्तव्यम् ? यथाज्ञापयति आर्यः तथा करोमि ।

सूत्रधारः— अस्मिन्भारतधर्ममहामण्डलमहाधिवेशनसमये रसिकभक्तमनोहरे रसमयं परदेवताभक्तिपोषकं कमपि नाटकं नटित्वा, आगतसर्वसभ्यमानोवृत्तिं एकरूपां ह्लादैकमयीं मङ्गलनायिकास्मृतिरूपकल्याणैकतानपरां कर्तुं मे महानुत्साहोऽस्ति ।

नटः— विस्मृतं किं तत्रभवता अस्त्येव नवनिर्मितं रतिविजयं नाम नाटकं यस्मिन्भवदभिलिषितगुणाः सुतरां विलसन्त्येव ।

सूत्रधारः— स्मराम्येवाधुना । कृतं खलु तत्तत्रभवतां महाशयानां सुन्दररामार्याणां चम्पकलक्ष्म्यम्बायाश्च तनू-

जेन रामस्वामिशास्त्रिणा । सः महाकविश्रीकालिदास-प्रभृतीनां रसिकमनोमोहनदिव्यवाक्यानि निरन्तरं भावयन्, स्वहृदि गीर्वाणभाषायाः प्राथम्यममृतस्वरूपं चावधार्य, सदैव यतते स्वदेशस्वभाषास्वनागरिकाणामौन्नत्याय । तथापि नवीनः खलु स कविः । तत्कृतं नाटकं सभारञ्जकं भवेत् किमिति मे शङ्कास्पदम् ।

नवीनं नाटकं काव्यं भाषागौरवमिच्छता ।
लक्ष्यते क्रूरया दृष्ट्या रसिकेन सदैव हि ॥ ४ ॥

नटः— रसिकश्रेष्ठाः भ्रमरा इव रसलोलाः खलु ।

यदि सन्ति गुणाः काव्ये रज्यन्ति रसिकमनांसि तत्रैव ।
सुन्दरसुगन्धिकुसुमे रतिरनिवार्या द्विरेफाणाम् ॥ ५ ॥

सूत्रधारः— सत्यमेव ब्रवीषि तथैव करिष्यामः । वयस्य, शिशिरीकुरुष्वास्माकं श्रोत्रेन्द्रियाणि मञ्जुलगानामृतेन ।

नटः— तथैव करोमि (गायति)

पल्लवि ।

मङ्गलनायकि—मङ्गलं देहि

अनुपल्लवि ।

गायकगायकी— मानसनायकि । (मङ्गल)

चरणम् ।

भक्तजनपालकि सर्वजगन्नायकि । (मङ्गल)

पल्लवि ।

अम्बां अखिलाण्डेश्वरीं अनुदिनं नमामि ।

अनुपल्लवि ।

दयामयीं जगत्पावनीं सर्वहृदयह्लादिनीं । (अम्बां)

चरणम् ।

काव्यगीतरागिणीं त्रिशक्तिदिव्यरूपिणीं । (अम्बां)

पल्लवि ।

जयतु जयत्वयं भारतदेशः

अनुपल्लवि ।

कर्मभूमिर्भोगभूमिः ।

पुण्यभूमिरिति ख्यातः ॥ (जयतु)

चरणम् ।

१. सूर्यनारायणफलप्रदभासः

पूर्णशशधरचारुप्रकाशः ॥ (जयतु)

२. इन्द्रचापशोभिवर्षवारिवाहः

चन्दनदेवदारुसुरभिगन्धवाहः ॥ (जयतु)

३. पर्वतमहाराजसाधुपरिपालितः
सप्तपुण्यनदीबहुविधलालितः ॥ (जयतु)

४. सुगन्धमनोहरकुसुममन्दहासः
नवरत्ननवधान्यकमनीयकोशः ॥ (जयतु)

५. नवरसमयकलामोहनविलासः
सरससंगीतलोलहरिहरदासः ॥ (जयतु)

६. धर्मनित्यनिरतसतीपतिवासः
चतुर्विधपुरुषार्थपूर्णनिवासः ॥ (जयतु)

७. उत्तमकविमुनिकृतपुण्योपदेशः
लीलावतारपवित्रप्रदेशः ॥ (जयतु)

सूत्रधारः— गच्छावः इदं नाट्यं दर्शयितुम् । कोऽत्रागच्छति ?

काव्यामृताब्धिलहरीसंबन्धाच्छिशिरहृत्प्रदेशोऽयम् ।
सुमनोहृदि रतिविजयं समेति वाञ्छन्रसवसन्तः ॥ ६ ॥

॥ इति प्रस्तावना ॥

(ततः प्रविशति वसन्तः ।)

वसन्तः— मन्मित्ररत्नस्य नाशं दृष्ट्वापि कथमहं जीवामि ! ननु कामश्च अहं च एक एवात्मा देहद्वयवद्भासमाने एक एव देहे ।

दुनोति चित्तं नितरां ममेदं
यदग्निरुग्रो भवनेत्रजातः ।
दग्ध्वार्धदेहं मदनस्य दिव्यं
क्रूरश्चकारार्धमदग्धमित्थम् ॥ ७ ॥

(ततः प्रविशति चित्रसेनः ।)

एह्येहि सुहृन्मणे, इयन्तं कालं कथं त्वम् अदृश्यतां गतः ?

चित्रसेनः— (सखे) चिरं हि मया दूरदेशवासः कृतः महाराजकुबेराज्ञया । इदानीमेव मेघदूत्यबलेन प्रियतमापुनरालोकनभाग्यमहमलभे । तत्परमलाभप्राप्तावपि न मे हृदि महानुत्सवो जातः । यतः श्रुताधुना मया सर्वलोकदुर्दशा मदनस्य भस्मीकरणेन । कथमिदं संवृत्तं किं नाम भवता देवैश्चेतरैर्भगवान् परमेश्वरः न प्रसादितः ।

वसन्तः— कथमहं वक्ष्ये हृदयमर्मच्छेदिनं मदनदुर्भाग्यवृत्तान्तम् । दुःसहशोकखिन्नं हृदयं सुहृद्बान्धवान् दृष्ट्व

द्विगुणीभूतशोकं भवति । तथाप्येतदेवाऽधिभेषजं मित्र-बन्धुभ्यः शोकोद्विग्नहृदयसर्वभावविवरणम् । अन्यथा खेदप्रवाहः प्रबलः प्रवृद्धश्च विशालमनसोऽप्यतिविशालः पूर्वानुभूतसुखलेशस्मृत्यल्पप्रवाहान् व्यपोह्य हृदयं दुःसह-दुःखमयमेव करोत्यसंशयम् ।

आनन्दपूर्तिमखिलां लरया व्यपोह्य
स्रोतःप्रवाह इह मे बहुदुःखरूपः ।
मित्रप्रणाशजनितः करुणातरङ्गः
शोकाब्धिपूरमधिगच्छति घोररूपम् ॥ ८ ॥

उन्मथ्य शोकजलधिं शुभभावदेवै-
र्धैर्याद्रिणा रसिकमाधवसंधृतेन ।
लभ्या मया मदनजीवनकोमलश्रीः
तद्वाक्सुधामुखशशीकरकल्पवृक्षौ ॥ ९ ॥

चित्रसेनः— अस्या दुर्घटनायाः कारणं किम् ?

वसन्तः— विदितमेव भवता यत्तारकासुरः तपःप्रभाव-लब्धत्रिलोकाधिपत्यः ऐश्वर्योत्कर्षप्रोद्भूतमदेन कृत्याकृत्य-मर्यादामुल्लङ्घ्य त्रिजगतीं पीडयामासेति । अद्यापि स नितरां पीडयत्येव । अमरास्तं क्रूरं पापमेव मूर्तमिव स्थितं

जगदीश्वराज्ञां तिरस्कुर्वन्तं तारकं लब्धवरप्रभावदुर्धर्षं दण्ड्यमपि दण्डयितुमशक्ताः सत्यलोकं गत्वा सर्वलोकपितामहं नत्वा तस्मै त्रिलोकीदुरवस्थां निवेदयामासुः ।

श्रुत्वा तन्निवेदितं चतुराननः स्वमुखपद्मैः शंकरात्मजेन सेनानीभूतेन स्कन्देन विना त्रिलोकीशोकापनयनं न भवेदित्युवाच । सतीवह्निप्रवेशानन्तरं महेश्वरो हिमालये तपसि स्थितः । कथं सः लोकाभ्युदयप्रवृत्तः पुत्रदानेन शोकसमुद्राज्जगतीमुद्धरेदिति मार्गमजानन् महेन्द्रः मन्मित्रमणिं मारं मनसा जगाम ।

तरीतुं तारकक्रौर्यसागरं घोरमक्षमाः ।
तारकं तारकब्रह्मस्वरूपं शंकरात्मजम् ॥ १० ॥
लब्धुं सेनान्यमिच्छन्तः पार्वतीं लोकपावनीम् ।
महेशः परिणेतुं ते विश्वमङ्गलगुप्तये ॥ ११ ॥
अचोदयन्ररतेर्नाथं शंभोर्जेतुं मनः स्थिरम् ।
सोऽपि तेभ्यः प्रतिज्ञाय जयं गत्वा हिमाचलम् ॥
दृष्टवांस्तत्र लोकेशं सच्चिदानन्दविग्रहम् ।
शुद्धस्फाटिकसंकाशं वेदवेद्यं परं विभुम् ॥ १३ ॥

चित्रसेनः— ततस्ततः मत्कौतुकस्य पर्याप्तिर्न विद्यते ।

वसन्तः—श्रूयतां सावधानमनसा ।

गत्वा सानुं हिमाद्रेर्धृतकुसुमशरश्चापमाकृष्य वीरः
रत्या सार्धं मया च प्रथितसुविभवश्चारुदेहाप्सरोभिः ।
शृङ्गारज्ञो रसानां निधिरपरिमितः पूर्णकामप्रदाता
लोकाह्लादं चिकीर्षुः पुरहरपुरतो ह्याविरासीद्रतीशः ॥
दृष्ट्वा तु देवदेवेशं योगभासुरविग्रहम् ।
नासाग्रदत्तदृष्टिं तं सुपद्मासनसंस्थितम् ॥ १५ ॥
आत्मारामं महादेवं महायोगीश्वरेश्वरम् ।
स्वीयाचित्कलया दीप्ताः कुर्वन्तं हि दिशो दश ॥१६॥
निवातदीपशोभाढ्यमात्मानन्दप्रसाददम् ।
तदा नष्टां प्रतिज्ञां स्वां मेने कामः प्रतापवान् ॥

चित्रसेनः—किं कृतं ततो मदनेन ?

वसन्तः—ततः

संजीविनी तस्य मृतात्मवीर्य-
यशःप्रभावादि महागुणानाम् ।
तत्रागता पर्वतराजपुत्री
संचारिणी मङ्गलदीपिकेव ॥ १८ ॥

पित्रा तां वरिवस्यायां नियुक्तां हि पिनाकिनः ।
दृष्ट्वा हृष्टस्तदा लेभे नवं धैर्यं सुमायुधः ॥ १९ ॥

चित्रसेनः— का सा पर्वतराजपुत्री ?

वसन्तः—

जितरतिसौन्दर्या सा
श्यामा मङ्गलमनोज्ञलावण्या ।
रसमयकाव्यकलाव-
द्धृदयानि चकार हृष्टानि ॥ २० ॥
चन्द्र इव पूर्णबिम्बः
विकसितपद्ममिव पुण्यगन्धाढ्यम् ।
वदनं तस्या रम्यं
कुङ्कुमतिलकेन संदीप्तम् ॥ २१ ॥

चित्रसेनः— ततस्ततः ।

वसन्तः— आगता सा तदा शुश्रूषां कर्तुं यत्र स्थितो भगवान् परमेश्वरः ।

चित्रसेनः— ततस्ततः ।

वसन्तः— तस्मिन्नेव काले मया कृतः रामणीयकविलासः

हिमाचलसानुप्रदेशेषु ।

पुष्पप्रभाशोभितभूरुहाणां
शाखासु लीनाः पिकवन्दिवर्याः ।
कामस्य राज्ञो मधुरस्वरेण
साम्राज्यशोभां जगुरात्तरागाः ॥ २१ ॥
देदीप्यमानो ह्युडुचन्द्रसूर्यैः
स्वच्छाम्बराः पुष्पवितानरम्यः ।
मदीयसंमोहनचारुशोभा
मनोजहारापि जितेन्द्रियाणाम् ॥ २२ ॥
प्रसन्नतोयो रमणीयवातः
संफुल्लहृद्योत्तमपुष्पगन्धः ।
मनःप्रसादस्य परं निदानं
कालस्तदा लोकमलंचकार ॥ २३ ॥

चित्रसेनः— ततः किं रूपः कामविलासः तत्र प्रकटीकृतः ।

वसन्तः—

अकालजातं खलु मद्विलासं
मनोहरं मङ्गलमद्भुतं च ।

वीक्ष्यैव लोलेन्द्रियवेगपूर्त्या
मनांस्यनङ्गस्य गतानि दास्यम् ॥ २४ ॥

देहेषु कान्तिर्नयनेषु तेजः
रागाख्यपीयूषझरी मनःसु ।
वृक्षेषु शोभा च मरुत्सुगन्धः
खे निर्मले पूर्णशशिप्रकाशः ॥ २५ ॥

चित्रसेनः— ततः किमकरोत् भगवान् नीलकण्ठः ।

वसन्तः— अनादृत्य मां च मदनं चात्मारामः योगासनारूढः प्रपञ्चविलासं स्वात्मनि साक्षीकुर्वन् आदिसंकल्पप्रभावादेव लोकस्थितिं अन्तर्यामित्वनियमितदेवैरेव कारयन् ब्रह्मानन्दपरिपूर्णः अचलित एव स्थितः ।

दृष्ट्वा तं योगीश्वरेश्वरं मदनः भयविह्वलान्तरङ्गः चित्रार्पित इव तस्थौ ।

न योगिवर्या अपि यत्तरेयुः
रागस्वरूपं च सुखोत्तरङ्गम् ।
कामार्णवं भोगविचित्ररत्नं
चन्द्रास्यसंदर्शनविप्रवृद्धम् ॥ २६ ॥

पश्यन् हि पारे विलसन्तमीशं
परात्परं योगिगणप्रमुख्यम् ।
दृष्ट्वाभवद्रागिगणप्रमुख्यो
भग्नप्रतिज्ञो निहतप्रभावः ॥ २७ ॥

चित्रसेनः— अहो महादेवस्याद्वितीयप्रभावः ।

वसन्तः— तस्मिन्नेव काले भगवान् नन्दी शंभवे निवेदयामास पार्वत्याः परिचर्यार्थमागमनम् ।

चित्रसेनः— ततस्ततः ।

वसन्तः— परमेश्वरस्याज्ञया पार्वतीं सखीयुक्तां नन्दिकेश्वरो निनाय यत्र स्थितो योगासने भगवान् पिनाकी ।

नक्षत्रशोभानुगतेव पूर्णा
शशिप्रभा नेत्रसुखप्रदात्री ।
सा पार्वती मोहनसुन्दराङ्गी
शंभुं ददर्शानुगता सखीभिः ॥ २८ ॥
वसन्तकालप्रभवैः प्रवालैः
पुष्पैः कृतालंकृतिरेव तत्र ।
रराज सा वन्यमनोज्ञवेषा
मूर्तेव वासन्तिकमङ्गलश्रीः ॥ २९ ॥

चित्रसेनः— ततः किं कृतम् ?

वसन्तः— तस्मिन्नेव काले उमावपुःसौन्दर्यं स्वपञ्चबाणाधिकं मन्यमानः निमिषमात्रात्प्येव स्वीयान्यस्त्राणि मत्वा रतीशः महादेवे मोहनास्त्रं प्रायुङ्क्त ।

चित्रसेनः— महाशक्तियुक्तं तदस्त्रं खलु त्रिभुवनजयिनः कामस्य ।

बिमोहयत्येव मनो मुनीनां
विरागिणां बश्यहृदिन्द्रियाणाम् ।
कथं न मुह्येद्रसिकस्य चित्तं
मग्नस्य भोगेष्वतिसुन्दरेषु ॥ ३० ॥
देहस्य दार्ढ्यं धनधान्यपुष्टिं
लोलेन्द्रियत्वं च रतेर्विलासम् ।
शंसन्ति कामास्त्रविमूढचित्ताः
रागाद्युवानः पुरुषार्थवर्गम् ॥ ३१ ॥

वसन्तः— उमापि मनोरथं निगूढं विवशैव प्रकटयन्ती जगदीशपुरतस्तत्पादाम्बुजे ध्यायन्ती स्थिता शृङ्गारलक्ष्मीः पूर्णकलेव ।

प्रेमव्रीडाकलितनयना तत्पदे दत्तदृष्टिः
देहे रम्ये पुलकसुभगा हेमवल्लीप्रकाशे ।
स्थित्वा साक्षाद्गिरिशपुरतः पार्वती पूर्णभावं
किंचिद्व्यक्तं हृदयविलसद्रागशक्त्या चकार ॥ ३२ ॥

स्थाणुस्तस्थौ चलितहृदयो भावपीयूषतृप्तः
देव्याः प्रेम्णा न तु मनसिजस्यास्त्रदिव्यप्रभावात् ।
स्मारं स्मारं हृदयसुखदं प्रेमपूर्णं हि सत्याः
पातिव्रत्यं विगलितवपुर्नाधिकारखिन्नम् ॥ ३३ ॥

सभ्रूभङ्गं नियमितमनो वृत्तिरीशो वशित्वा
शृङ्गारेच्छां हृदयसुखदां भग्नवेगां निरुध्य ।
शंभुश्चक्रे नयनविषयं मारमात्तप्रकोपः
नेत्राग्नौहाचलशलभतां सद्य एवाप मारः ॥ ३४ ॥

चित्रसेनः— तत्पूर्वमेव कथं न प्रसादितो देवैर्भगवान् कालकालः ।

वसन्तः— देवप्रार्थनापूर्वमेव एकस्मिन्क्षणे जातः मदन-दुर्दशापरिपाकः ।

वारिवाहे यथा विद्युदनिवार्या प्रकाशते ।
तथा कोपाग्निरुग्रो हि हरनेत्रादजायत ॥ ३५ ॥

क्षणादेव हि तज्ज्वालाः लोकसुन्दरविग्रहम् ।
भस्मावशेषं मदनं चकाराऽस्मान्महाव्यथान् ॥ ३६ ॥
कथमहं सहिष्ये भर्तृवियोगपरिम्लानं रतिमुखं द्रष्टुम् ।

(ततः प्रविशति रतिः)

रतिः— हा प्रियनायक किं कृतं मया यत अदर्शनीयतां गतो भवान् ।

पूर्णोत्सवो नयनयोर्निरवधिरानन्द एव चित्तस्य ।
प्राक्कृतबहुपुण्यफलं हासः शब्दश्च ते प्रेम ॥ ३७॥
हा वसन्त कथमहं सहिष्ये भर्तृमुखप्रकाशरहितं मज्जीवित-दुर्दिनम् ।

वसन्तः— देवि किं ब्रवीमि ? नाहं शक्नोमि द्रष्टुं काम-महिषीं गतामिमामवस्थाम् ।

रतिः— मत्प्राणनाथस्य प्राणोज्जीवनमार्गं ब्रूहि शीघ्रं मे अनाथायाः ।

स्मरामि नित्यं परिपूर्णचन्द्र
प्रभासमानद्युतिवक्त्रबिंबम् ।
लीलावलोकं मधुरं कटाक्षं
सुधामयं तस्य समन्दहासम् ॥ ३८ ॥

किं कृतं मया यस्य फलं प्राणनाथप्राणवियोगकारणं जातम् । अस्मिन् जन्मनि मया भर्तृपादारविन्ददेवतया न किंचिदपि विधिविलङ्घनं कृतम् ।

वसन्तः—आर्ये समाश्वसिहि । संवृत्त एव जन्मान्तरकर्मपरिपाकः । सर्वलोकेषु प्रथितवैभवं रतिमदनदांपत्यं विफलं जातम् । परमेश्वर, दयामूर्ते, तव कृपाकटाक्षं कदा करोषि त्वदीयदासेषु । त्वमेव वैद्यनाथः परमौषधं मदनसंजीवनं भवदनुग्रहरूपं रत्यै देहि ।

रतिः—अस्ति काश्चिन्मङ्गलोपायः ?

वसन्तः—अस्त्येव । परमेश्वरः अभ्युदयनिःश्रेयप्रदाता प्रसन्नो यदि स एव कामारिः कामप्रदो भवेत् ।

रतिः—कथं सः महासंहारमूर्तिः योगेश्वरः कैवल्यपतिः प्रसादयितव्यः । सतीदेव्या अन्तर्धानानन्तरं सः समाधियोगमवलम्ब्य दुष्प्रापस्तिष्ठति । किं करोम्यहम् ।

वसन्तः—विस्मृतं किं देवरहस्यं यत्सती पार्वती भूत्वा परमपुरुषं शुश्रूषत इति । महादेवोऽपि जानात्येव त्रिकालज्ञः जगदीश्वरः । स एव प्रार्थनीयः पराशक्तिं स्वीकृत्य कुमारं देवरक्षार्थं दातुं कामं च सजीवं कर्तुम् ।

चित्रसेनः—किं वा देवी मन्यते ।

रतिः—नाहं शक्नोमि तं कालकालं जगत्प्रभुं द्रष्टुं ध्यातुं वा । देवीमेवानुग्रहमयीमज्ञातनिग्रहां जगद्रतिप्रदां कामाक्षीं प्रति तपः करोमि ।

चित्रसेनः—सम्यगभिहितं देव्या ।

वसन्तः—तमेवं मङ्गलमुपायं साधयामस्तावत् ।

(इति निष्क्रान्ताः सर्वे ।)

इति प्रथमोऽङ्कः ॥



द्वितीयोऽङ्कः ।

(ततः प्रविशतः पुण्डरीकः सरोजिनी च ।)

पुण्डरीकः—किमिदं जातं यन्ममापि शृङ्गारपुरुषस्य कामिनीकटाक्षलोलस्य बिम्बाधरसुधापानचपलस्य मनसि रतिक्षयो जातः । चन्द्रः कामोद्दीपनकलामयः अधुना रजनीदीपनामेव गतः । वसन्तोऽपि कुसुमपरिमलवाही शैत्यसौरभ्यमान्द्यादिगुणैर्मनोमोहकारी तापशमनगुणमेकमेवावलम्बते ।

चन्द्रोऽपि षोडशकलो
मृदुशिशिरसुगन्धिमलयवातोऽपि ।
प्रागिव मोहनमौढ्यं
शृङ्गारमयं न मे कुरुतः ॥ १ ॥

किंच मे प्रियतमायाः भावगर्भं च गीतमधुना न मे मनो रमयति यथापूर्वम् ।

सरोजिनी—(गायति)

पल्लवि ।

संगीतरसिक शृणु गीतमारम् ।

अनुपल्लवि ।

मधुरमसृणसुकुमारं
निहितसकलमनोभारं
शृणु शृणु वारं वारम्—[संगीत]

चरणम् ।

श्राव्यशारीरभूषितं मन्द्रस्वरं
दशविधगमकचारुप्रचारं
सकलजनमनोचोरम्—[संगीत]
कृष्णवेणुगानं स्मारं स्मारं
संपूज्य सुकुमारं मारं
भूप्रदेशे स्वर्गद्वारम—[संगीत]

पुण्डरीकः—प्रिये श्रुत्वापि ते कर्णसुखं गीतं कथमिव मे मनसि सुखाविर्भावो नास्त्येव । (आत्मगतं)

यद्दर्शनान्नयनयोर्महदुत्सवोऽभूत्
संभाषणाच्छ्रवणयोरमृतप्रवाहः ।
संश्लेषणाद्वपुषि भूरिसुखोपभोगः
नैवाधुना प्रियतमैव ददाति हर्षम् ॥ २ ॥

सरोजिनी—(आत्मगतं) कथमिव मे नाथः शृङ्गारविमुखो जातः । (प्रकाशम्) आर्यपुत्र कथमिव ते वदनाम्बुजं न प्रकृष्टशोभं पूर्वमिव ।

पुण्डरीकः—किं वदामि । मनसः शृङ्गारसुखं निष्क्रान्तमिव ।

सरोजिनी—ममापि नोत्साहः पूर्वमिव । (कर्णं दत्वा) किमाह वसन्तः । ईश्वरीं रतिसौख्यप्रदानार्थं प्रार्थयतामिति । उभावपि गौर्यालयं गत्वा सर्वमङ्गलां कामाक्षीं कामदां शृङ्गारमङ्गलावाप्त्यर्थं प्रार्थयावहे ।

(इति निष्क्रान्तौ ।)

[ततः प्रविशति कविः दुर्गादासः]

दुर्गादासः—इतःपूर्वं निरन्तरमेव भावानन्दसुधाप्रवाहः मे हृदयं पूरयामास । इदानीं कथमिव जातो मन्मनःप्रदेशः निर्वर्षमरुभूमिरिव । न मे मनसि रसस्फूर्तिः पूर्ववज्जायते । शान्तिभक्तिविवर्धितरसपुष्टिं विना कथमुत्तमवाग्झरी प्रसरेत् । (कर्णं दत्वा)

किमाह वाग्देवी । कलानिधिं, काव्यकलां, रसज्ञां, रसशेवधिं, कलात्मिकां, कलामयीं, कलानाथां, काव्यलोलां, काव्यालापविनोदिनीं, कलावतीं, कलालापां, गद्यपद्यात्मिकां,

साधुबन्धपदन्यासां, सारविद्यां, मधुजिह्वां, मधुमतीं मनसि काव्यकलारतिविलासाय भावयेति । तथैव करोमि ।

कलामयी ददौ मह्यं पूर्णां काव्यकलासुधाम् ।
यामास्वाद्य हि मर्त्योऽहं देवभोगमवाप्तवान् ॥ ३ ॥

अक्षरायै दयामूर्त्यै पूजां कृत्वा यतेन्द्रियः ।
प्रार्थये तां रसानन्दास्वादजानां सुवाग्झरीम् ॥ ४ ॥

(इति निष्क्रान्तः)

[ततः प्रविशति श्यामलादासः]

श्यामलादासः—इतःपूर्वं सुधासारसमुज्ज्वलः स्वरगङ्गा-प्रवाहः श्यामलाकरुणाविलासान्मत्सकाशाद्धु स्वाग्निसंतप्त-सकललोकसमुद्धारार्थं अजायत । इदानीं मे स्वरविलासः लोकान्तरं गत एव । न मे मनसि पूर्ववत्सुखस्पूर्तिरस्ति । मज्जन्म सांप्रतं भारभूतमेव । (कर्णं दत्वा) किमाह इष्टदेवता श्यामला । गानलोलुपां संगीतरसिकां आदिशक्तिं कमनीयस्वरकुसुमैरभ्यर्चयेति । तथैव करोमि । ईश्वरीमेव याचे सर्वसंमोहनस्वरविलासप्राप्त्यै संगीतरतिविलासपूर्त्यै ।

(गायति)

पल्लवि ।

१ नमामि शिरसा वाचा मनसा
बालां ललितां त्रिपुरां गौरीम् ॥

२ पराशिवदयिते त्रिपुरे ललिते
देहाज्जीवे गन्तुं चलिते ।
आर्तं दीनं कृपया परया-
ऽगच्छ त्रातुं तरुणि त्वरया ॥

३ दीक्षायुक्तौ चरणौ मन्ये
पापित्राणे हिमगिरिकन्ये ।
यस्मान्मामपि मूर्तं पापं
त्रातुं भवती प्राप्ता तापम् ॥

४ तीव्रैर्दुःखैस्तप्तं दीनं
तीर्थाद्बहिरिव निहितं मीनम् ।
करुणारससंस्पर्शनतोमे
त्रायस्व त्वं मां धृतसोमे ॥

५ एनोभूम्ना रचिता न मया
देवीसेवा सा मयि सदया ।

माता स्नेहाद्रक्षति पुत्रं
वत्सो यद्यपि न दयापात्रम् ॥

६ हस्तौ कुरुतं देवीपूजां
जिह्वे संस्तुहि दक्षतनूजाम् ।
मानस सततं भावय ललितां
भक्तांस्त्रातुं दीक्षाकलिताम् ॥

७ वीणानादे श्राव्ये सुखितां
शिवपर्यङ्के धवले शयिताम् ।
पापे मग्नो यात्रे दानं
देवीं करुणां हित्वा मानम् ॥

८ शंकरि रूपं हृदये कलये
तारय संसाराब्धिं सदये ।
श्रीकरि सुन्दरि वन्दे चरणौ
पङ्कजसदृशौ त्राणे निपुणौ ॥

(इति निष्क्रान्तः ।)

[ततः प्रविशति राजराजः]

राजराजः—अस्मिन्पुण्यदेशे मदाज्ञावशवर्तिनि धर्म्यप्रवृत्ति-निरतजनपूर्णे कथं सर्वत्र जनसमृद्धिः सुखसमृद्धिश्च

हीयते । शक्तित्रययुक्तोऽप्यहं शक्तिपरित्यक्त इव दीनचित्तः संवृत्तः । राज्यकार्यधुरन्धरस्य मे राज्यपरिपालनं भारास्पदमेव जातम् । प्रकृतयेऽपि गलितप्रकृतय इव न रमन्ते दारेषु, पुत्रेषु, वित्तेषु, कर्मसु वा कदापि । किमहं करिष्ये ? (कर्णं दत्वा) किमाह त्रिलोकाधिपतिः महेन्द्रः । राजराजार्चितां, राजराजेश्वरीं, राज्यदायिनीं राजत्कृपां, राजपीठनिवेशितनिजाश्रितां, राज्यलक्ष्मीं, कोशनाथा, चतुरङ्गबलेश्वरीं, साम्राज्यदायिनीं, दैत्यशमनीं, सर्वलोकवशंकरीं, एकैश्वर्यप्रदायिनीं, एकातपत्रसाम्राज्यप्रदां, सर्वप्रजाहृदयेषु धर्मरति प्राप्त्यै आराधयेति ।

(गायति)

पल्लवि ।

स्तुवे सदा राजराजेश्वरीम् ।

अनुपल्लवि ।

साम्राज्यप्रदायिनीं

चतुरङ्गबलेश्वरीं—(स्तुवे सदा)

चरणम् ।

दीक्षितां दैत्यशमनीं

सर्वलोकवशंकरीं—(स्तुवे सदा)

(इति निष्क्रान्तः ।)

[ततः प्रविशतः महेन्द्रो बृहस्पतिश्च ।

महेन्द्रः—गुरो किं नाम करिष्यामि यदधुना मदनोऽपि मद्दुर्दशापरिपाकात्कथावशेषतां गतः ।

बृहस्पतिः—त्रिलोकनाथ एक एव ह्युपायः सदैव सफलः । अञ्जलिरेव परमा मुद्रा क्षिप्रं देवप्रसादिनी । काममंजीविनीं शृङ्गाररससंपूर्णां कन्दर्पजनकापाङ्गवीक्षणां सहस्ररतिसौन्दर्यप्रकाशां श्रीविद्यारूपिणीं नित्यकल्याणीं सर्वमङ्गलसंपन्नां साक्षान्मङ्गलदेवतां यो भजते स एव पराशक्तिभक्तः सकलदुर्भाग्यानि सत्त्वरमेव तरति । सैव कामसंजीविनी हतकन्दर्पजीविका कामकलारूपा हरनेत्राग्निसंदग्धकामसंजीषधिर्भवेत् ।

महेन्द्रः—यथाऽज्ञापयति भगवान् तत्तथैव करोमि ।

बृहस्पतिः—त्रिलोक्यां सर्वे भवदाज्ञया परमेश्वर्याराधने ऐहिकामुष्मिकसाम्राज्यानुभवसंजातरतिविजयप्राप्त्यै शासितव्याः । सार्वजनीनप्रार्थना सद्यःफला भवेत् । दयामूर्तिः सद्यःप्रसादिनी भक्तसौभाग्यदायिनी सान्द्रकरुणा महाकामेशमहिषी कामेश्वरप्राणनाडी परमेश्वरी तदैव स्वसङ्कल्पप्रभावेन प्रसन्नं परमेश्वरं कृत्वा लोकमङ्गलं विधास्यति । सैव उमा हैमवती बहुशोभमाना तुभ्यं ब्रह्मस्वरूपोपदेशं

सौभाग्यब्रह्मविद्यास्वरूपं त्वद्भक्तिफलभूतं अचिरादेव दास्यति ।

महेन्द्रः—तथैव करोमि ।

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधके ।
शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तु ते ॥

(इति निष्क्रान्तौ ।)

इति द्वितीयोऽङ्कः ॥



तृतीयोऽङ्कः ।

(हिमाचलसानुप्रदेशेषु तपोवेषा रतिः प्रविशति ।)

रतिः—यतःप्रभृति ईश्वरीं प्रति तपःकृतं मया तत एव मे मनसि शान्तिकलाविलासः जातः मङ्गलावाप्तिसूचकनिमित्तानि च भवन्ति । अस्मिन्रमणीयप्रदेशे मधुरानिर्झरिणीकलरवपरिपूर्णे विविक्तसानुस्थले उत्तमतपोनुकूले कस्य मनो न प्रसीदेत् ।

शान्तिकलापरिपूर्णे साधुमृगे कुसुमपूर्णवृक्षेऽत्र ।
सुन्दरकुन्दरदेशे लभेत को वा न हृच्छान्तिम् ॥१॥

(गायति)

पल्लवि ।

सौभाग्यलक्ष्मीं भजे सदा

अनुपल्लवि ।

सर्वलोकमाङ्गल्यकरीं

श्रीचक्रस्थितसुन्दरीं—(सौभाग्य)

चरणम् ।

सौवर्णाम्बरधारिणीं

सकलजनेष्टदायिनीं—(सौभाग्य)

कदा परमेश्वरी प्रसन्ना भवेत् । (कर्णं दत्वा) कथमिव श्रूयेत आश्रमान्तिके मधुरः नूपुरशब्दः । वासन्तिके इत एहि ।

वासन्तिका—(प्रविश्य) देवि आगताहं भवदादेशकांक्षिणी ।

रतिः—सखि! न भवती मे किंकरी; किन्तु प्रियवयस्या । मन्नाथप्रियमित्रस्य वसन्तस्य पुत्री खलु त्वं । कथमधुनैव श्रुतः मञ्जुलनूपुरशब्दोऽत्र ।

वासन्तिका—एका चेट्यागतात्र पार्वतीदेव्याः सकाशात् भवद्दर्शनकाङ्क्षिणी ।

रतिः—प्रवेशय तां सद्यः ।

वासन्तिका—तथैव करोमि । (इति निष्क्रम्य जयया सह प्रविश्य)

रतिः—कुत आगता तत्रभवती । किमर्थमेष आश्रमः अलंक्रियते भवत्या ।

जया—आगताहं पर्वतराजपुत्र्या प्रेषिता ।

रतिः—अतीव हृष्टास्मि । ममाद्यामङ्गलं नष्टं यतः तत्रभव-

त्यनुग्रहमयी मद्विषये जाता । किं रूपा तस्या आज्ञा ?

जया—महाराजकुमारी उमा ज्ञातुं वाञ्छति का तत्रभवती किमर्थं भवता तपस्तप्यत इति ।

रतिः—उमां हैमवतीं द्रष्टुं मम महत्कौतुकमस्ति । यदि भवत्यै रोचते नय मां पार्वतीतपःपवित्रीकृतपुण्यप्रदेशम् ।

जया—तथास्तु । गच्छामः । (इति निष्क्रान्ताः सर्वे)

पार्वतीतपःप्रदेशः ।

[ततः प्रविशति तपोवेषा पार्वती ।]

पार्वती—स्मरामि नित्यं स्मरहरं जगन्नाथम् । तपोमार्गेणैव लभ्यः स योगीश्वरेश्वरः इति महर्षिभ्यो ज्ञात्वाहं तपसैव तं समाराधयितुं प्रवृत्ता । अधुनापि न मे भगवत्प्रसादः जातः । किं करोमि ।

स्मयमानचन्द्रवदनं चन्द्रोत्तंसितजटाकलापं तम् ।
किं गङ्गाधरममलं पश्येयं चिन्मयानन्दम् ॥

जया—(प्रविश्य) राजपुत्रि, सन्निहिताश्रमस्था तापसी तत्रभवतीं द्रष्टुकामागता ।

पार्वती—प्रवेशय शीघ्रमेव ताम् ।

जया—तथैव करोमि । (इति निष्क्रान्ता ।)

[ततः प्रविशति रतिः ।]

रतिः—(सविनयं प्रणम्य) भवतीं मनोज्ञदर्शनां दृष्ट्वा संचिन्त्य

तपसः काठिन्यं च वेपते मे हृदयम्। तथापि तपसा ज्वलन्तीं त्वां जगन्मङ्गलमूर्तिं दृष्ट्वा तर्कयामि परमोत्कृष्ट-वरलाभाय भवत्या तपः क्रियत इति।

पार्वती—अनवाप्तमनोरथास्तपसैव पूर्णमनोरथाः स्युः। साधनं विना कथं साध्यलाभः। अस्तु तत्। किमर्थं तपस्तप्यते भवत्या। उत्तमकुलप्रसूतां राजवंशालंकारभूतां त्वामहं वपुर्वाग्गुणैस्तर्कयामि।

तव वपुषः सौन्दर्यं ऋजुता करुणा च लोचनद्वन्द्वे।
चारुस्मितमपि मृदुवाग्वदन्ति भावस्य संशुद्धिम्॥

रतिः—(दीर्घं निश्वस्य) त्वमेव मम जन्मरोगस्य सिद्धौषधम्।

पार्वती—कथमिव।

रतिः—मन्नाथः सर्वचित्तप्रभुः देवभूत्यर्थं संमोहनास्त्रेण परमेश्वरं प्रहर्तुमभ्युद्यतः सद्यैव भस्मीकृतः शम्भुफालनेत्रजात-कृशानुना। तत्रभवती च तस्मिन्समये तत्रैव स्थिता खलु। मह्यं दुर्भाग्यखिन्नायै माङ्गल्यभिक्षा देया तत्रभवत्या।

पार्वती—कथं रतिर्भवती? अनुकम्प्या सर्वदा सर्वैरपि यतः भवतीनाथः लोकहितार्थं स्वप्राणानपि ददौ। किं कार्यं मया। परवशा ह्यहम्।

रतिः—सर्वं ज्ञातमेव भवत्या। न भवती केवलं हैमवती।

सर्वजगदाधारशक्तिः, परमेश्वरसंकल्पसाफल्यकरी, दैत्यशमनी, प्राणेश्वरी, प्राणदात्री, प्राणदा, प्राणरूपिणी, सर्वोपद्रवनाशिनी, सर्वमृत्युनिवारिणी, मृत्युदारुकुठारिका, मृतसंजीविन्यमृतस्वरूपा, दुर्गालक्ष्मीसरस्वतीरूपिणी पराशक्तिर्मोक्षलक्ष्मीः, भक्तानामार्तिनाशिनी, इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिस्वरूपिणी खलु ।

पार्वती--किमेभिर्गुणैः । परमेश्वरप्रसादहीनाहमधुना ।

रतिः--सत्यव्रता वशीकृतजगत्पतिस्त्वम् । भविष्यति भगवत्प्रसादः शीघ्रमेव । तदा नाहं विस्मर्तव्या । अधुनैव देहि मे माङ्गल्यवरम् ।

पार्वती--दीर्घसुमङ्गली भव । बालाप्यहं तत्प्रसादबलेन भवत्यै माङ्गल्यवरं ददामि । पूरयतु परमेश्वरः सर्वम् । त्वत्प्रार्थनापूरणाय परमेश्वरं प्रति तपः करोमि ।

रतिः--यदि तत्रभवती तपश्चरिष्यति मदर्थं सिद्धैव मे प्रार्थना ।

यदि सकललोकजननी करुणामूर्तिस्त्वमेव मे वरदा ।
सद्यो मे माङ्गल्यं कारुण्यादेव ते सिद्धम् ॥ ४ ॥

इति तृतीयोऽङ्कः ॥

चतुर्थोऽङ्कः ॥

[ततः प्रविशति नैष्ठिकब्रह्मचारिवेषः परमेश्वरः जया च ।]

परमेश्वरः--तपोधनोऽहं लोकोत्तरतपश्चरणादसमानकीर्तिं पार्वतीं दृष्ट्वा मां परिपूतं कर्तुमागतः ।

हृदयस्य शान्तिलक्ष्मीं सत्संदर्शनं तनोति लोकेऽस्मिन् ।
इहपरशुभसुखमूलं पापहरः पुण्यहेतुश्च ॥ १ ॥

जया--आगच्छतु तत्रभवान् यत्र सा पार्वती विलसति तपसा ज्वलन्ती ।

परमेश्वरः--गच्छावः । (इति निष्क्रान्तौ ।)

[ततः प्रविशति पार्वती ।]

पार्वती—कदा खलु भगवत्प्रसादो जायते । मत्तपसा परमेश्वरः न सम्यगाराधित इति मन्ये । (गायति ।)

पल्लवि ।

परमकृपानिधे पाहि मां पशुपते ।

अनुपल्लवि ।

पाहि किङ्करीं ते
भक्तदत्तसद्गते—[परमकृपा.]

चरणम् ।

जगद्वन्द्य जगत्पते
करुणां तनु दासेषु ते—[परमकृपा.]

जया—(प्रविश्य) राजपुत्रि कश्चन नैष्ठिकब्रह्मचारी भवतीं द्रष्टुकामः आगतः । आकारतः परमशिवभक्त इव भासते ।

पार्वती—(आत्मगतम् ।) कोऽयं नैष्ठिकब्रह्मचारी । नाहं द्रष्टुमिच्छामि तम् । तथापि तमहं प्रष्टुकामा यत्रास्ति चन्द्रशेखरः सांप्रतमिति ।

वामं नयनमिदं मे स्फुरति हि संसूचयन्सुखं पूर्णम् ।
वामश्च बाहुरपि मे स्फुरति हि शंसन्निवानन्दम् ॥ २ ॥

(प्रकाशम् ।) जये प्रवेशय तं तपोधनम् ।

जया—यथाज्ञापयति तत्रभवती ।

परमेश्वरः—महदौत्सुक्यं मे भवतीं द्रष्टुं यतः भवत्याऽद्वितीयप्रभावं महातपस्विनामप्यसुलभं परमेश्वरप्रसादस्य

निःसंशयकारणं तप्तं तपः । तथापि जगन्मङ्गलभूतया सुकुमारशरीरया किमर्थमिदं घोरं तपस्तप्यते ।

पार्वती--हृष्टाऽहं यदिदं पृष्टं भवता । यतो महतामनुमोदनेनाऽनुग्रहेण च सत्कर्म सफलं निश्चयमेव भवति । श्रूयतां मत्सङ्कल्पो निवेदितो मत्सख्या ॥

जया--राजपुत्री परमेश्वरमेव पतिमवाप्तुं तपः करोति । कदा सः जगत्प्रभुः सदयो भवति न जाने ।

परमेश्वरः—कथमिदमनया कृतम् । इयं सर्वलोकमनोहारी सर्वाङ्गसुन्दरी तन्वी प्रार्थनीयतमा । अनुचितमेतद्यत्सा प्रार्थयत इति ।

कल्पकवृक्षो लोके सुरमहितः सर्वलोककमनीयः ।
कृपणं नरमिह करुणं वांछेद्भूमिं कथं नेतुम् ॥ ३ ॥

जया—कल्पकवृक्षेणापि सर्वमङ्गलकारणं कथं न प्रार्थनीयम् ।

परमेश्वरः--कोऽयं सर्वक्षेमविधाता ।

जया--परमेश्वरः ।

परमेश्वरः--(विहस्य)

अमङ्गलनिदानं सः कथं मङ्गलकारणम् ।
कपाली च विरूपाक्षः सर्पाभरणभूषितः ॥ ४ ॥

भासितालिप्तसर्वाङ्गो रुद्रभूमिप्रियः सदा ।
भिक्षाटनो गणस्वामी वृद्धो वृषभवाहनः ॥ ५ ॥

अज्ञातवंशो भीमश्च विषाहारो दिगम्बरः ।
अकिंचनप्रियो नित्यं त्यक्तसर्वपरिग्रहः ॥ ६ ॥

एकाकी कृत्तिवासाश्च मदोषे ताण्डवप्रियः ।
कथं सोऽर्हति लोकस्य रत्नभूतां सुमध्यमाम् ॥ ७

पार्वती—(ससंभ्रमं स्फुरितोत्तराधरम् ।)

चन्द्रसूर्याग्निनेत्रं तं सर्वलोकमहेश्वरम् ।
न त्वं जानासि मे नाथं जगन्मङ्गलमङ्गलम् ॥ ८ ॥

शुद्धस्फटिकसंकाशं सच्चिदानन्दविग्रहम् ।
न त्वं जानासि मे नाथं जगन्मङ्गलमङ्गलम् ॥ ९ ॥

महेश्वरं महादेवं नित्यशुद्धं भवौषधम् ।
न त्वं जानासि मे नाथं जगन्मङ्गलमङ्गलम् ॥१०॥

मन्दस्मितं दयामूर्तिं कोटिकन्दर्पविग्रहम् ।
न त्वं जानासि मे नाथं जगन्मङ्गलमङ्गलम् ॥११॥

गुरुं तं सर्वलोकानां दक्षिणामूर्तिरूपिणम् ।
न त्वं जानासि मे नाथं जगन्मङ्गलमङ्गलम् ॥ १२ ॥

गङ्गाधरं त्रिणेत्रं तं चन्द्रमौलिं जटाधरम् ।
न त्वं जानासि मे नाथं जगन्मङ्गलमङ्गलम् ॥ १३ ॥

नीलकण्ठं महाकालं जगदानन्दकारिणम् ।
न त्वं जानासि मे नाथं जगन्मङ्गलमङ्गलम् ॥ १४ ॥

सत्यरूपं जगन्नाथं शङ्करं मुक्तिदायकम् ।
न त्वं जानासि मे नाथं जगन्मङ्गलमङ्गलम् ॥१५॥

महापापहरं शान्तं पुण्यमूर्तिं शिवं परम् ।
न त्वं जानासि मे नाथं जगन्मङ्गलमङ्गलम् ॥ १६ ॥

सर्ववेदान्तवेद्यं तं योगिध्येयपदाम्बुजम् ।
न त्वं जानासि मे नाथं जगन्मङ्गलमङ्गलम् ॥ १७ ॥

केदारेशं च विश्वेशं नटेशं सुन्दरेश्वरम् ।
न त्वं जानासि मे नाथं जगन्मङ्गलमङ्गलम् ॥ १८ ॥

विभूतिदीप्तं पुण्याङ्गं नागरत्नविभूषितम् ।
न त्वं जानासि मे नाथं जगन्मङ्गलमङ्गलम् ॥ १९ ॥

पुराणपुरुषं देवं लोकमूलं स्वयंभुवम् ।
न त्वं जानासि मे नाथं जगन्मङ्गलमङ्गलम् ॥ २० ॥

एकमेवाद्वितीयं तं महावाक्योपदेशकम् ।
न त्वं जानासि मे नाथं जगन्मङ्गलमङ्गलम् ॥ २१ ॥

समामृतविषं शुद्धं कैवल्यपददायकम् ।
न त्वं जानासि मे नाथं जगन्मङ्गलमङ्गलम् ॥ २२ ॥

आनन्दनटराजं तं चिन्मयानन्दविग्रहम् ।
न त्वं जानासि मे नाथं जगन्मङ्गलमङ्गलम् ॥ २३ ॥

शिवं शान्तं परं पूर्णं साक्षान्मन्मथमन्मथम् ।
न त्वं जानासि मे नाथं जगन्मङ्गलमङ्गलम् ॥ २४ ॥

कृपानिधिं जगद्वन्द्यं सर्वज्ञं विष्णुवल्लभम् ।
न त्वं जानासि मे नाथं जगन्मङ्गलमङ्गलम् ॥ २५ ॥

शाश्वतं तारकं नित्यमष्टमूर्तिं तपस्विनम् ।
न त्वं जानासि मे नाथं जगन्मङ्गलमङ्गलम् ॥ २६ ॥

शब्दशास्त्रोपदेष्टारं नृत्याचार्यं कलानिधिम् ।
न त्वं जानासि मे नाथं जगन्मङ्गलमङ्गलम् ॥ २७ ॥

वेदागमप्रदातारं मन्त्रमङ्गलदायकम् ।
न त्वं जानासि मे नाथं जगन्मङ्गलमङ्गलम् ॥ २८ ॥

त्रिकालसत्यं तं नित्यं पितामहपितामहम् ।
न त्वं जानासि मे नाथं जगन्मङ्गलमङ्गलम् ॥ २९ ॥

स्थितं वटतरोर्मूले युवानं सुरसुन्दरम् ।
न त्वं जानासि मे नाथं जगन्मङ्गलमङ्गलम् ॥ ३० ॥

यथोदितं तथैवास्तु भगवान्परमेश्वरः ।
स एव प्राणनाथो मे तद्वशं मम जीवितम् ॥ ३१ ॥

नाहं तिष्ठामि यत्रासौ दूषयन्परमेश्वरम् ।
तिष्ठत्येहि यतः प्रोक्तौ पापौ श्रोता च दूषकः ॥

चिन्मयानन्दमूर्तिर्यः संसारार्णवतारकः ।
महाकारुणिको योगी शंकरो मे प्रसीदतु ॥ ३३ ॥

नष्टमार्गान्भवाटव्यां दुःखपूर्णांश्च विह्वलान् ।
मार्गबन्धुः सदा पाति शंकरो मे प्रसीदतु ॥ ३४॥

यस्य स्मरणमात्रेण पापौघः शून्यतां व्रजेत् ।
ज्ञानपद्मस्य सूर्यो यः शंकरो मे प्रसीदतु ॥ ३५ ॥

सर्पहारी च संहारी विहारी हृदयाम्बुजे ।
विषाहारी मनोहारी शंकरो मे प्रसीदतु ॥ ३६ ॥

त्रातुं लोकान्भयत्रस्तान्क्ष्वेलं घोरं हि योऽपिबत् ।
कारुण्यमूर्तिरुग्रोऽपि शंकरो मे प्रसीदतु ॥ ३७ ॥

भगीरथस्य भक्तस्य त्रातुं दग्धान्पितामहान् ।
गङ्गावतारं यश्चक्रे शंकरो मे प्रसीदतु ॥ ३८ ॥

अभिषेकप्रियः शुभ्रः महाकैलासनायकः ।
आत्मारामः परं ब्रह्म शंकरो मे प्रसीदतु ॥ ३९ ॥

[नेपथ्ये आकाशवाणी ।]

पार्वति, कोपं मा कुरु। तपसाराधितः परमेश्वर एवागतः। सम्यगवलोकय तम् ।

परमेश्वरः—सत्यमेवैतत् । प्रसन्नोऽस्मि संतुष्टोऽस्मि संवीक्ष्य तपःप्रभावं प्रेमभक्तिं च ते। यद्यद्वांछितं तद्ब्रूहि । ददामि सर्वं तत् ।

पार्वती—(प्रणम्य) जगन्नाथ, प्रसीदतु भगवान् । अहं तु भवदधीना भवत्प्रथमकिंकरी मज्जीवितं त्वत्पादारविन्दयोरर्पितवती । एको वरः सद्य एव देयः ।

परमेश्वरः—ब्रूहि यद्यद्वाञ्छितम् ।

पार्वती—भवत्प्रसादबलेन माङ्गल्यभिक्षां अहं रत्नै दत्तवती। भगवता तद्वरं पूरणीयम् ।

परमेश्वरः—प्रिये पराशक्त्या परदेवतया भवत्या परमकृपयावलोकिताया मम्मनोरथत्वं कथं भवति । तथैवास्तु ।

[इति निष्क्रान्ताः सर्वे ।]

इति चतुर्थोऽङ्कः ॥

पञ्चमोऽङ्कः ॥

[ततः प्रविशति कृतविवाहमङ्गलवेषौ पार्वतीपरमेश्वरौ हिमवत्सहितौ ।]

परमेश्वरः--प्रिये समवलोकयेमं लोकं भवतीप्रसादोज्जीवितम् । यद्यत्पूर्वनष्टरसं तत्सर्वमपि सरसं जातम् ।

पार्वती-- सर्वमपि भवत्कृपाविलास एव ।

हिमवान्--धन्यतमोऽहं यज्जगतः पितरौ मद्दुहितृजामातरौ । भवत्कृपा सदैवास्तु मयि ।

परमेश्वरः--सदैवायं पुण्यदेशः आर्यावर्तो भवता शत्रुभ्यः रक्षितव्यः ।

हिमवान्-- यथाज्ञापयतीश्वरः ।

[ततः प्रविशति रतिवसन्ताभ्यां सह कामः ।]

कामः--(पार्वतीपरमेश्वरौ प्रणम्य) यूयं जगतामादिदंपती लोकानुग्रहार्थं कृतलीलाविवाहौ मह्यं वरप्रदौ आज्ञाप्रदौ च भवेतामिति मे प्रार्थना । सर्वमृत्युनिवारिण्याः कृपया मृत्युंजयानुग्रहो मे लब्धः पुनर्जीवलाभरूपः । भवदाज्ञां नित्यमेवेतःपरं करिष्यामि ।

परमेश्वरः—(कामं प्रति)

धर्मप्रियो भवान्नित्यं भवेदीश्वरकिंकरः ।
पूर्णानन्दस्त्वया देयो धर्म्यो रागो भवेद्यदि ॥ १ ॥
मन्मथत्वं च मारत्वं मदनत्वं विहाय हि ।
कन्दर्पत्वं च संत्यज्य दर्पकत्वमनंगताम् ॥ २ ॥
पञ्चेषुत्वं स्मरत्वं च रतीशत्वं च कामताम् ।
अवलम्ब्य सदा शाधि त्रीँल्लोकान्धर्मवत्सलः ॥ ३ ॥

कामः—यथाज्ञापयति लोकनाथः ।

रतिः—(पार्वतीं प्रति) पूर्णकामाहं भगवतीप्रसादेन ।

सफलं तपो मदीयं पातिव्रत्यं च मामकं सफलम् ।
यदियं हि लोकमाता प्रसादमकरोन्मयि श्लाघ्यम् ॥

पार्वती—भवत्या स्मरेण च भगवदाज्ञां स्मृत्वा यथा धर्मव्यतिक्रमो न भवेद्यथा शिवभक्तिः भुक्तिमुक्तिप्रदा जायेत तथा मनःप्रपञ्चः परिपालनीयः ।

रतिः—यथाज्ञापयतीश्वरी ।

[ततः प्रविशतः महेन्द्रः बृहस्पतिश्च ।]

महेन्द्रः—सर्वलोकानामपि महानभ्युदयो जातोऽद्य ।
परमेश्वरस्य करुणा परिपूर्णा पार्वतीतपःफलरूपा ।

बृहस्पतिः— वेदवेद्यस्य परमपुरुषस्य संकल्पः तस्यैव विदितः नान्यस्य ।

परमेश्वरः—सर्वं यदभिमतं युवयोस्तत्तथैव भवतु ।

[ततः प्रविशन्ति, पुण्डरीकः, सरोजिनी, श्यामलादासः, दुर्गादासः, राजराजश्च ।]

राजराजः— कामेश्वरकामेश्वरीकल्याणोत्सवेन पवित्रीकृता धरित्री । अयं पुण्यदेशः आर्यावर्तः धर्मनिरतो भूयादिति भगवत्संकल्पं प्रतीक्षे ।

परमेश्वरः—तथैवास्तु ।

पुण्डरीकः—धर्माविरुद्धकामैः परिशुद्धहृदयैः जगती पूर्णा भवेदिति मे सविनयप्रार्थना ।

सरोजिनी—रसिकाः देशानुरागपूर्णाः ईश्वरभक्तियुक्ताः सर्वकलानिपुणाः भवेयुरिति प्रार्थये ।

पार्वतीपरमेश्वरौ— तथैवास्तु ।

दुर्गादासः—काव्यकलारसस्फूर्तिः तज्जनितानन्दानुभवश्च सर्वत्र विजयतामिति याचे ।

पार्वतीपरमेश्वरौ—तथैवास्तु ।

दुर्गादासः—

कामाक्षि कामेश्वरदेवि माये
भवत्कटाक्षोत्थसुधाप्रवाहैः ।
कामाग्निसंदग्धमनःप्रदेशं
कारुण्यमूर्ते शिशिरीकुरुष्व ॥ ५ ॥

मत्पापशत्रुं हि विजेतुकाम-
स्त्वत्पादपद्मं शरणं व्रजामि ।
मुक्तिप्रदाने खलु दीक्षितं य-
न्मोहाटवीमोहितमानसानाम् ॥ ६ ॥

पापालयं पामरहृत्प्रदेशं
पाषण्डनास्तिक्यमतप्ररोहैः ।
कामादिभिः संततमेव पूर्णं
देवालयं ते हि कथं करोमि ॥ ७ ॥

निधेहि मे मानसहेमपीठे
पदद्वयं पार्वति जन्मभारम् ।
त्यक्त्वा ततो मोक्षपदं व्रजेयं
क्षेमप्रदे केवलचित्स्वरूपे ॥ ८ ॥

आरोढुमाहुस्तव भक्तिसौधं
सोपानभूतं बहुपुण्यकर्म ।
पापात्मनो देहि करावलम्बं
कारुण्यरूपं परमेश्वरि त्वम् ॥ ९ ॥

पार्वती—भक्तान्सदैव रक्षिष्यामि परमेश्वरसंकल्पानुसारमिति प्रतिजाने ।

श्यमालादासः—(गायति)

पल्लवि ।

सुधामयी मयि भवतु जगदम्बा ।

अनुपल्लवि ।

सर्वमनोहरमङ्गलमञ्जुलवेषा ।

चरणम् ।

काव्यसंगीतकला
भक्तदत्तमुक्तिफला—सुधा.

(गायति) पल्लवि ।

जगन्मोहनसंगीतं विलसतु

अनुपल्लवि ।

किन्नरगन्धर्वनारदप्रियं—जगन्मो.

चरणम् ।

संजीविनीधरवातात्मजप्रियं
मङ्गलश्यामलावाणीप्रियं —जगन्मो.

पार्वती—तथैवास्तु । रते किमतःपरं ते प्रियं करोमि ।

रतिः—भगवतीदर्शनानन्तरं किं प्रार्थनीयम् । तथापीद-
मस्तु भरतवाक्यम् ।

विस्तीर्णे भूतलेऽस्मि-
न्विलसतु नितरां शान्तिसाम्राज्यलक्ष्मीः ।
देशोऽयं भारताख्यं
प्रथितसुखमयो धर्ममूलं च भूयात् ॥
वैषम्यं रागजन्यं
भवतु च शमितं देशभक्तिप्रभावात् ।
वैदग्ध्यं सर्वशस्त्रे-
ष्वपि सकलकलास्वस्तु चित्ते जनानाम् ॥

(इति निष्क्रान्ताः सर्वे ।)

इति पञ्चमोऽङ्कः ॥

इति रतिविजयनाटकं संपूर्णम् ॥



शुद्धिपत्रम् ।

पृष्ठम्	अशुद्धम्	शुद्धम्
१	वर्धि	बाधि
६	ष्ट्व	ष्ट्वा
८	ततस्तत:	ततस्तत: ।
११	रा:	र:
१४	बि	वि
१५	नाधिक्कार	नाथधिक्कार
१५	म्रौ	म्रौ
१६	ब्य	ठ्य
१७	करोषि	करिष्यसि
२०	कृष्णवेणु	चारुवेणु
२१	तोमे	तोऽमे
२५	प्रकृतयेऽपि	प्रकृतयोऽपि
२५	कोशनाथा	कोशनाथां
४५	सुधामयी	दयामयी

ಪುಸ್ತಕದ ಸಂಖ್ಯೆ O-2394

